प्रधानसमूहे अङ्गानां तन्त्रश्रुतेः अङ्गानां सकृदनुष्ठानं श्रूयते यतः। तथाहि "सा एकविंशतिराहुतयो द्वावाघारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्वदग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्रयोऽनुयाजाः सूक्तवाकश्च शंय्वोर्वाक् स्वाथ यदेवादः पत्नीसंयाजेषु समष्टहोति समिष्ट यजुश्चेति तत्राग्नेयोपांशुयाजाग्नीषोमीयलक्षण एकफले प्रधानसमवाय आहुतीनामेकविंशतिसंख्या श्रूयते सा चाङ्गानां सकृत्करणपक्ष एवोपपद्यते न प्रतिप्रधानं पृथगनुष्ठानपक्षे। तस्मात् प्रधानानां सहप्रयोगे सकृदेवारादुपकारिका क्रिया सन्निपत्योपकारकाणां प्रतिप्रधानमावृत्तिरिति तु प्रागुक्तमेव। अथ प्रधानानां सहप्रयोगे कारणान्याह" कर्कः। "फलकर्मदेशकालद्रव्यदेवतागुणसामान्ये" ३सू०। यत्रैकेन वाक्येन बहूनि प्रधानकर्माणि एकफलसाधनत्वेन विधीयन्ते तत्र तेषामितरेतरापेक्षाणां साधनत्वेन विधानात् सहप्रयोगः तद्यथा मित्रविन्दाश्रीराष्ट्रमित्रायुष्कामस्येति वैश्वदेवेन प्रजाकामं याजयेदिति अत्र मित्रविन्दाशब्देन समुदायवचनेन दशानां हविषां सहप्रयोगः वैश्वदेवशब्देन च समुदायवचनेनाष्टानां हविषाम्। सूत्रार्थस्तु सामान्यशब्दः प्रत्येकं सम्बध्यते फलसामान्ये कर्मसामान्ये देशसामान्ये कालसामान्ये द्रव्यसामान्ये देवतागुणयोः सामान्ये इति एकवाक्येनैकफलसाधनत्वेन विधानेऽपि फलादिसामान्ये सत्येव प्रधानानां सहप्रयोगो भवति फलं स्वर्गादि कर्म पञ्चप्रयाजता त्र्यनुयाजतेत्यादि। देशः समप्राचीनप्रवणादिः। कालः पूर्वाह्णापराह्णादिः। द्रव्यं दक्षिणाद्रव्यम् न तु हविर्द्रव्यम् अनेकेषु प्रधानकर्मसु तद्भेदस्यावश्यम्भावात् देवता प्रजापतीन्द्रादिः। तद्गुणः उपांशुत्वाश्राव्यत्वादिः तस्मिन् सति प्रधानमपि सहैव भवति न पृथक्" कर्कः "तद्भेदे भेदः" ४सू०। तेषां फलादीनां भेदस्तद्भेदः तद्भेदे तेषां फलादीनां सहप्रयोगकारणानां भेदे सति प्रधानानां प्रयोगभेदो भवति तत्र प्रयोगवचनभेदान्मित्रविन्दाप्रीतिकामाग्नेययोर्न सहप्रयोगः फलभेदाच्च श्रीकामराष्ट्रकाममित्रकामायुष्काममित्रविन्दानां पृथक् प्रयोगः। कर्मभेदेऽपि प्रयोगभेदो भवति तद्यथा कस्यचित् पञ्चप्रयाजता कस्यचिन्नवप्रयाजता यथा च क्रौडिनीया महाहविषोस्तन्त्रसहत्वे इतरेतरस्य विगुणत्वं भवति। देशभेदेऽपि तन्त्रभेदो भवति यथा वरुणप्रयासेषु मारुत्याः क्रौडिनीमहाहविषोश्च क्रौडिन्याः समदेशः महाहविषस्तु प्राचीनप्रवणः। कालभेदेऽपि सहप्रयोगो न भवति यथा दर्शस्य पौर्णमासस्य च "पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति वचनेन कालभेदेन तयोर्विधानात्। यथा वा आग्नीकवतीसान्तपनीययोः पूर्वाह्णमध्याह्नरूपकालभेदात्तन्त्रभेदः। दक्षिणाद्रव्यैक्ये सति सहप्रयोगो यथा राजसूये त्रयाणां त्रिषंयुक्तानां येषां मते च त्रिषंयुक्तानां त्रयाणामप्येकस्मिन्नेवाहन्यनुष्ठानम् तेषां दक्षिणाद्रव्यभेदेन त्रयाणां त्रयाणां पृथगनुष्ठानम् न सर्वेषां सहप्रयोगः दक्षिणाभेदश्च त्रयाणां वामनः त्रयाणां श्यामः त्रयाणां बभ्रुरिति तत्र दक्षिणाभेदादानतिभेदः तद्भेदात्तत्कृतस्य स्वरूपस्य भेदः वामनानतैर्हि पूर्वं कर्म कर्त्तव्यम् श्यामानतैरुत्तरम् तन्त्रत्वे तूभाभ्यामानता उभयं कुर्युः। तत्र दक्षिणाव्यवस्था गम्यमाना बाध्येत। तस्मात् प्रतिदक्षिणं तन्त्रभेदः। अत्र एकवाक्येनैकफलार्थमेव विधाने देशकालकर्मैक्ये सत्यपि दक्षिणाभेदात्तन्त्रभेदः। देवताया देवतागुणस्य च सामान्ये सति उच्चारणमपि तस्या देवताया आवाहनत्यागादौ तन्त्रेण भवति यथा सप्तदशप्राजापत्येषु राजपेये प्रजापतेर्देवतायाः समानत्वाद्गुणस्योपांशुत्वस्य च समानत्वादनुवचनादौ तन्त्रेणोच्चारणं भवति यागोऽपि तन्त्रेणैव भवति। तथा च प्राजापत्यान् प्रकृत्य श्रूयते एकानुवाक्या भवत्येकयाज्यैकदेवत्या हि प्राजापत्या इत्युपांशुत्वाच्च छागानां हविषोऽनुब्रूहीति अत्रानुवाक्याद्येकत्वे एकदेवतत्वं हेतुं ब्रुवती एकदेवताकानां सिद्धं तन्त्रोच्चारणं दर्शयति। दर्शपूर्णमासयोरेव द्रव्यभेदेऽपि दध्नः पयसश्च देवताया इन्द्रस्य तद्गुणस्य चाश्राव्यत्वस्य समानत्वात्तन्त्रेणैव याग उच्चारणं भवति। देवतायां समानायामपि देवतागुणस्योपांशुत्वादेर्भेदे सति सहोच्चारणं न भवति यथा प्रकृतावेवोपांशुजापाग्नीषोमयोः पुरोडाशाग्नीषोमयोश्च। इह देवतातद्गुणयोः सामान्ये यागस्य तन्त्रेणानुष्ठानमुच्यते अत्र सिद्धमेव देवतागुणसामान्ये तन्त्रेण यागानुष्ठानमुपजीव्य भेदो यागस्य भेदेनानुष्ठानपूर्वं निषिद्धः न द्रव्यभेदे गुणयोगादिति वा तस्य इति न पुनरुक्तिदोषादि।" कर्कः।